# Shridevi Mangalashtakam

# શ્રીદેવી મઙ્ગલાષ્ટકમ્

## Document Information

Text title : devImangalAShTakam

File name : devImangalAShTakam.itx

Category : devii, mangala, aShTaka

Location : doc_devii

Proofread by : PSA Easwaran

Latest update : January 5, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 5, 2020

*sanskritdocuments.org*

# શ્રીદેવી મઙ્ગલાષ્ટકમ્

શ્રીવિદ્યા શિવનામભાગનિલયા કામેશ્વરી સુન્દરી
    સૂક્ષ્મસ્થૂલદશાવિશેષિતજગદ્રૂપેણ વિદ્યોતિની ।
સ્વાંશીભૂતસમસ્તભૂતહૃદયાકાશસ્વરૂપા શિવા
    લોકાતીત મદાશ્રયા શિવસતી કુર્યાત્સદા મઙ્ગલમ્ ॥ ૧॥

દુર્ગા ભર્ગમનોહરા સુરનરૈઃ સંસેવ્યમાના સદા
    દૈત્યાનાં સુવિનાશિની ચ મહતાં સાક્ષાત્ ફલાદાયિની ।
સ્વપ્ને દર્શનદાયિની પરમુદં સન્ધાયિની શાઙ્કરી
    પાપઘ્ની શુભકારિણી સુમુદિતા કુર્યાત્સદા મઙ્ગલમ્ ॥ ૨॥

બાલા બાલાર્કવર્ણાઢ્યા સૌવર્ણામ્બરધારિણી ।
ચણ્ડિકા લોકકલ્યાણી કુર્યાન્મે મઙ્ગલં સદા ॥ ૩॥

કાલિકા ભીકરાકારા કલિદોષનિવારિણી ।
કામ્યપ્રદાયિની શૈવી કુર્યાન્મે મઙ્ગલં સદા ॥ ૪॥

હિમવત્પુત્રિકા ગૌરી કૈલાસાદ્રિવિહારિણી ।
પાર્વતી શિવવામાઙ્ગી કુર્યાન્મે મઙ્ગલં સદા ॥ ૫॥

વાણી વીણાગાનલોલા વિધિપત્ની સ્મિતાનના ।
જ્ઞાનમુદ્રાઙ્કિતકરા કુર્યાન્મે મઙ્ગલં સદા ॥ ૬॥

મહાલક્ષ્મી પ્રસન્નાસ્યા ધનધાન્યવિવર્ધિની ।
વૈષ્ણવી પદ્મજા દેવી કુર્યાન્મે મઙ્ગલં સદા ॥ ૭॥

શમ્ભુપ્રિયા ચન્દ્રરેખા સંશોભિતલલાટકા ।
નાનારૂપધરા ચૈકા કુર્યાન્મે મઙ્ગલં સદા ॥ ૮॥

મઙ્ગલાષ્ટકમેતદ્ધિ પઠતાં શૃણ્વતાં સદા ।
દદ્યાદ્દેવી શુભં શીઘ્રમાયુરારોગ્યભાગ્યકમ્ ॥ ૯॥

ઇતિ શ્રીદેવી મઙ્ગલાષ્ટકં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

*Shridevi Mangalashtakam*

pdf was typeset on January 5, 2020

Please send corrections to *sanskrit@cheerful.com*